लज्जालुः, पुं, स्त्री, (लज्जैवास्या अस्तीत्यर्थे आलुः।) क्षुपविशेषः। तत्पर्य्यायः। रक्तपादी २ शमीपत्रा ३ स्पृक्का ४ खदिरपत्रिका ५ सङ्कोचिनी ६ समङ्गा ७ नमस्कारी ८ प्रसारिणी ९ सप्तपर्णी १० खदिरी ११ गण्डमालिका १२ लज्जा १३ लज्जिरी १४ स्पर्शलज्जा १५ असरोधिनी १६ रक्तमूला १७ ताम्रमूला १८ स्वगुप्ता १९ अञ्जलिकारिका २०। इति राजनिर्घण्टः॥ महाभीता २१ वशिनी २२ महौषधिः २३। इति शब्दचन्द्रिका॥ अस्या गुणाः। कटुत्वम्। शीतत्वम्। पित्तातिसारशोफदाहश्रमश्वासव्रणकुष्ठ-कफास्रनाशित्वञ्च॥ तद्भेदो यथा,—

"लज्जालुर्विपरीतान्या अल्पक्षुपा बहुकण्टका।
वैपरीत्या च लज्जालुर्नामाभिधाने प्रयोजयेत्॥
लज्जालुर्वैपरीत्याख्युः कटुरुष्णः कफापहृत्।
रसे नियामकश्चैव नानाविज्ञानकारकः॥"
इति राजनिर्घण्टः॥

अन्या हंसपादीशब्दे द्रष्टव्या॥ * ॥ अपि च।

"लज्जालुः स्यात् शमीपत्रा समङ्गाञ्जलिकारिका।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि॥
लज्जालुः शीतला तिक्ता कषाया कफपित्तजित्।
रक्तपित्तमतीसारं योनिरोगान् विनाशयेत्॥"

अथ लज्जालुभेदः।

"अलम्बुषा खरत्वक् च तथा मेदोगला स्मृता।
अलम्बुषा लघुः स्वादुः कृमिपित्तकफापहा॥"
इति भावप्रकाशः॥

अन्या दुग्धिकाशब्दे द्रष्टव्या॥

लज्जाशीलः, त्रि, (लज्जा शीलं स्वभावो यस्य।) लज्जाविशिष्टः। तत्पर्य्यायः। अपत्रपिष्णुः २। इत्यमरः॥ लज्जितः ३। इति शब्दरत्नावली॥

लज्जितः, त्रि, (लज्जा सञ्जातास्य। लज्जा+तारकादित्वात् इतच्।) लज्जायुक्तः। तत्पर्य्यायः। ह्रीणः २ ह्रीतः ३। इत्यमरः॥ (यथा, रघुः। १२। ७५।

"कामं जीवति मे नाथः इति सा विजहौ शुचम्।
प्राक् मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता॥")

लज्जिरी, स्त्री, लज्जालुः। इति राजनिर्घण्टः॥

लज्या, स्त्री, लज्जा। इति शब्दरत्नावली॥

लञ्ज, तु क भासने। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-अक०-सेट्।) क, लञ्जयति। भासनं दीप्तिः। इति दुर्गादासः॥

लञ्जः, पुं, (लञ्जयति शोभते इति। लञ्ज+अच्।) पदः। कच्छः। इति हेमचन्द्रः॥ पुच्छः। इति जटाधरः॥

लञ्जिका, स्त्री, (लञ्जयति शोभते इति। लञ्ज+ण्वुल्। टापि अत इत्वम्।) वेश्या। इति हेमचन्द्रः॥

लट, बाल्योक्त्योः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० च-सेट्।) बालोऽज्ञः तस्य भावो बाल्यं व्यामोह इति यावत्। लटति लोकः शिशुः स्यात्। किञ्चिद्वदति वेत्यर्थः। इति दुर्गादासः॥

लटः, पुं, (लटति यथेच्छया वदतीति। लट+अच्।) प्रमादवचनम्। दोषः। इति विश्वः॥

लटकः, पुं, (लटतीति। लट्+"कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि।" उणा० २। ३२। इति कुन्।) दुर्जनः। इत्युणादिकोषः॥

लटपर्णं, क्ली, (लटसुग्रं पर्णमस्य।) त्वचम्। इति राजनिर्घण्टः॥

लट्टः, पुं, दुर्जनः। इति शब्दरत्नावली॥

लट्वः, पुं, (लटतीति। लट+"अशूप्रुषिलटीति।" उणा० १। १५१। इति क्वन्।) जातिविशेषः। नेटुया इति भाषा॥ रागभेदः। तुरङ्गमः। इत्युणादिकोषः॥

लट्वा, स्त्री, (लट्+क्वन्। टाप्।) करञ्जभेदः। नाटाकरञ्जा इति भाषा। वाद्यभेदः। पक्षिविशेषः। ग्रामचटक इति ख्यातः। इति मेदिनी। वे, २२॥ कुसुम्भम्। इति हेमचन्द्रः॥ भ्रमरकः। भोमरी इति ख्यातः। इत्यमरभरतौ॥ (शिखी। इति हारावली। २५६॥ तूलिका। द्यूतम्। यथा,—

"लट्वा तु तूलिका ख्याता लट्वा द्यूतेऽपि दृश्यते॥"

इति व्याडिरभसौ।" इति उणादिवृत्तौ उज्ज्वलः। १। १५१॥)

लड, विलासे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) लड़ति बाला। इति दुर्गादासः॥

लड, इ कि भाषणे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) इ, लण्ड्यते। कि, लण्डयति लण्डति। भाषणं कथनम्। अयं केश्चिन्न मन्यते। इति दुर्गादासः॥

लड, ओ इ कि उत्क्षेपणे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) ओ, लण्डिनः। अनुबन्धबलादिमृत्यवधानेऽपि निष्ठातस्य नत्वम्। अस्मात् निष्ठायामिम् न स्यादिव्येके। लण्ड् इति। इ, लण्ड्यते। कि, लण्डयति लण्डति तण्डुलं लोकः। इति दुर्गादासः॥

लड, क उपसेवे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) उपसेव इह अत्यन्तपालनम्। क, लालयेत् पञ्चवर्षाणि पुत्त्रमिति अत्र डलयोरेकत्वाल्लत्वम्। कल्पनायामस्य प्रयोगः। इति रमानाथः। लाडयति लतां वायुः। इति दुर्गादासः॥

लड, क ड वीप्से। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्। क ड, लाड़यते। लाभ एव इत्यन्ये। विशेषेण आप्तुमिच्छा वीप्सा। इति दुर्गादासः॥

लड, तु क क्षेपे। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-सक०-सेट्।) लड़यति। अललाड़त्। इति दुर्गादासः॥

लड, म उन्मन्थनजिह्वयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-क्वचित् पीड़नादौ सक०-सेट्।) उन्मन्थनं पीड़ितीभावः उत्क्षिप्तीभावश्च। लड़ति लता वायुना पीड़िता उत्क्षिप्ता वा स्यादित्यर्थः। जिह्वा तद्विषयक्रिया। लड़ति जिह्वा स्यन्दनवती स्यादित्यर्थः। म, लड़यति। लड़यति त्वचमुल्ललयत्यम्बूनिति श्रीहर्षः। पीड़यतीत्यर्थः। कवाटघ्नीमिन्दुः किरणलहरीमुल्ललयतीति मुरारिः। उत्क्षिपतीत्यर्थः। उभयत्र डलयोरेकत्वाल्लत्वम्। केचित्तु जिह्वोन्मन्थने इति पठित्वा जिह्वाया उन्मन्थनं उत्क्षेपणमिति व्याख्याय लड़ति जिह्वां सर्प इत्येवोदाहरन्ति। इति दुर्गादासः॥

लड़हः, त्रि, मनोज्ञः। इति त्रिकाण्डशेषः॥

लडुः, त्रि, दुर्ज्जनः। इति शब्दरत्नावली॥

लड्डुकः, पुं, पिष्टकविशेषः। लाड़ु इति भाषा॥ यथा। लड्डुको दुर्ज्जरो गुरुः। इति राजवल्लभः॥ अपि च।

"तैलेन हविषा पक्वं भवेत् चूर्णञ्च लड्डुकः॥"
इति शब्दचन्द्रिका॥

लण्डं, क्ली, (लण्ड्यते उत्क्षिप्यते इति। लण्ड+घञ्।) पुरीषम्। ल्याड़ इति भाषा। यथा,—

"समेधमानेन स कृष्णबाहुना
निरुद्धवायुश्चरणांश्च निक्षिपन्।
प्रस्विन्नगात्रः परिवृत्तलोचनः
पपात लण्डं विसृजन् क्षितौ व्यसुः॥"

इति श्रीभागवते १० स्कन्धे ३७ अध्याये ८ श्लोकः॥ लण्डं पुरीषमुत्सृजन्। इति तट्टीकायां श्रीधरस्वामी॥

लण्डजः, त्रि, (लण्डे तदाख्यदेशे जायते इति। जन्+डः।) लण्डदेशजातः। यथा,—

"पूर्व्वाम्नाये नवशतं षड़शीतिः प्रकीर्त्तिताः।
फिरङ्गभाषया मन्त्रास्तेषां संसाधनात् भुवि॥
अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः।
इंरेजा नव षट् पञ्च लण्डजाश्चापि भाविनः॥"
इति मेरुतन्त्रे २३ प्रकाशः॥ * ॥

लण्डस्तु अधुना लण्डन् इति ख्यातः। इंरेजानां राजधानी च॥

लत, भाते। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) लता। इति दुर्गादासः॥

लता, स्त्री, (लतति वेष्टयति वृक्षमिति। लत+पचाद्यच्। टाप्।) शाखादिरहिता गुडूच्यादिः। तत्पर्य्यायः। वल्ली २ व्रततिः ३। इत्यमरः॥ वल्लिः ४ वेल्लिः ५ प्रततिः ६। सा शाखापत्रसमायुक्ता चेल्लतानिनी। इति शब्दरत्नावली॥ तत्पर्य्यायः। वीरुत् २ गुल्मिनी ३ उलपः ४। इत्यमरः॥ * ॥ अमायां वीरुधां छेदकर्तुर्निन्दा